अङ्क-२७
जनवरी-जून २०१६

**वेदविद्या**
ISSN-2230-8962

# वैदिकस्वरास्तेषां प्रयोजनानि च

**प्रो. राजेश्वर मिश्रः**

वैदिकसाहित्यस्य प्रायः सर्वे ग्रन्थाः उदात्तादिस्वरैर्युक्ता आसन्निति संहिताब्राह्मणारण्यकानामध्ययनेन अनुशीलनेन च स्पष्टतया परिलक्षितो भवति। संहिताः सर्वास्तु सस्वराः सन्ति, परन्तु सम्पूर्णं शतपथब्राह्मणमथ च तैत्तिरीयब्राह्मणस्य, तैत्तिरीयारण्यकस्य, ऐतरेयारण्यकस्य बृहदारण्यकोपनिषदश्च कतिपयानि स्थलान्यपि उदात्तादिस्वरैरङ्कितान्युपलभ्यन्ते। **"शतपथवत्ताण्डिभाल्लविनां ब्राह्मणस्वरः"(३.१५)** इत्यनेन भाषिकसूत्रेण ज्ञायते यत् पञ्चविंश-ब्राह्मणमन्ये च ब्राह्मणग्रन्थाः कदाचित् सस्वरा आसन्। आचार्यपाणिनेः **"विभाषा भाषायाम्"** (अष्टा. ६.१.१८१) सूत्रेणेत्थं प्रतिभाति यत्तेन वैदिकस्वरैः सह लौकिकशब्देष्वपि स्वराः निर्दिष्टाः, यत्र कुत्रापि च तेन भेदो दृष्टः तत्र सूत्रेणानेन स्वरभेदो निर्दिष्टः। इतोऽप्यधिकं तात्कालिकेषु 'गौप्त'-दात्तादिषु शब्देषु स्वरभेदेन अर्थभेदमुपदेष्टुं तेन् 'अण्', इति प्रत्ययद्वयं विहितम्। विधानेनानेनासौ स्पष्टतया निर्दिशति यद् विपाशउत्तरेकूले ये कूपास्तेष्वञ्प्रत्ययो भवति, दक्षिणतश्च कूपेष्वण्प्रत्ययो भवति।[1]

अनेन लोके प्रयुक्तस्वराणां रक्षणाय पाणिनेः स्वीया सूक्ष्मेक्षिका दृष्टिः परिलक्ष्यते; या काशिकाकारेणापि सङ्केतिता।[2] अतः सूक्ष्मदृशा समग्रभाषाणां स्वरविवेचनार्थमाचार्यपाणिनिना न केवलं चित्-ञित्-नित्-कित्-तित्-पित् प्रत्ययेषु आगमेषु च चकाराद्यनुबन्धानां जटिला प्रक्रियाङ्गीकृता, प्रत्युत स्वराणां सम्यक्परिज्ञानाय चतुश्शतं सूत्राणि अपि पृथग्रूपेण रचितानि।

अतिप्राचीनकाले मनुस्मृति-निरुक्तादयो ग्रन्था अपि स्वरयुक्ताः आसन्निति प्राचीनहस्तलिखितैर्ग्रन्थैरवगम्यते। उदाहरणार्थ - मृक्श्लोकनाम्ना श्लोकद्वयं सस्वरं निरुक्ते (३.४) उद्धृतम्।[3] अनयोरेकस्य पूर्वार्द्धमात्रं **(अङ्गादङ्गात्सम्भवसि---)** तु शतपथब्राह्मणे (१४.९.४.८) गोभिलगृह्यसूत्रे (२.८.२१) चोपलभ्यते; अतः तस्य सस्वरं पाठोऽपेक्षितः, परन्त्वपरः श्लोकः (अविशेषेण पुत्राणाम्----) **कस्माच्चिद्**धर्मशास्त्रग्रन्थादुद्धृत इति प्रतीयते । तस्य स्वरपाठेन तु प्रमाणितं भवति यत्तस्मिन् काले स्वराः

[1] अष्टा० ४.२.७४ : उदक्च विपाशः इत्यस्य सूत्रस्य व्याख्या- विपाश उत्तरे कूले ये कूपास्तेष्वञ् । दत्तेन निर्वृत्तो दात्तः कूपः (गुप्तेन निर्वृत्तो गौप्तः कूपः) । उदकं किम् दक्षिणतः कूपेष्वणेव (दात्तः, गौप्तः) ।

[2] तत्रैव, काशिका; महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य।

[3] निरु०, ३.४ : अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥
अविशेषेण पुत्राणां दायो भवति धर्मतः।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्॥

सम्भाषणस्याभिन्नान्यङ्गान्यासन्। एतदतिरिच्यान्यत्रापि निरुक्ते (१४.६) लौकिकसंस्कृतेन निबद्धाः "**मृतश्चाहं पुनर्जातो**"- इत्यादयः त्रयः श्लोकाः सस्वरम् उद्धृताः सन्ति।[४] एतेषु प्रथमस्य पूर्वोर्द्धो भावानुवादरूपेण अथ च द्वितीयस्य पूर्वार्द्धो यथावद् गर्भोपनिषदि (खण्ड.४) उद्धृतः, द्वितीयः श्लोकश्च महाभारते विद्यते,[५] परन्तु तत्र उभावपि स्वररहितौ वर्तेते। वैजनाथकाशीनाथराजवाडेमहोदयेन सम्पादिते निरुक्तेऽपि कतिपयेषु मन्त्रभिन्नांशेषु स्वरचिह्नान्युपलभ्यन्ते; यथा "**सचस्वा नः स्वस्तये**" (ऋ० १.१.९) मन्त्रांशस्य व्याख्या- '**सेवस्व नः स्वस्तये**" स्वरयुक्ता प्रदत्ता।[६] प्रमाणान्येतान्यभिलक्ष्य केषाञ्चिद् विदुषां मते समग्रं निरुक्तं सस्वरमासीदिति ज्ञायते।

पाणिनिसमये वैदिकस्वराणां महत्त्वमासीदिति निःसंशयं सत्यम्; अतो वैदिकस्वरं प्रति पाणिनेरास्थां मनसि निधायानेके विद्वांसोऽङ्गीकुर्वन्ति, यदष्टाध्यायीग्रन्थोऽपि सस्वरमासीत्, परन्तु कालान्तरे वैदिकस्वरं प्रति उपेक्षाभाववशादेष ग्रन्थोऽपि स्वरचिह्नाद् विहीनः सञ्जातः। आचार्यपाणिनेरष्टाध्यायीग्रन्थः एकश्रुतिस्वरेण पठित इति कैय्यटस्य महाभाष्यप्रदीपव्याख्यया ज्ञायते।[७] अस्य, ग्रन्थस्य सर्वाणि सूत्राणि एकश्रुतिस्वरेण पठितानीति महाभाष्यस्याध्ययनेनापि सस्फुटं परिलक्ष्यते।[८] केषाञ्चित् प्राचीनविदुषां मतावलम्बिना कैयटेन तु अष्टाध्यायीग्रन्थे एकश्रुतिस्वर एवानुमतम्।[९] कानिचित् श्रौतसूत्राणि अपि मतमेतद् दृढीकुर्वन्ति। तदानीन्तने काले तानस्वरस्यैव (एकश्रुतेरेव) प्रामुख्यमासीदिति कात्यायनश्रौतसूत्रेण ज्ञायते।[१०] आश्वलायनश्रौतसूत्रेऽपि ऋङ्मन्त्रपाठे एकश्रुतिस्वरो निर्दिष्टः, तस्य लक्षणमपि तत्र प्रदत्तम्।[११] साक्ष्यैरेभिः स्फुटं प्रतिभाति यत् श्रौतसूत्राणां प्रवचनकालाद् (२०००) विक्रम० पूर्वम्) बहु पूर्वमेव मन्त्रोच्चारणे केवलमेकश्रतिस्वर एवानशिष्ट आसीत्। परन्तु प्रमाणैरेभिस्तु सत्यमेतद् यत् प्राचीनवैदिकवाङ्मयस्याधिकं साहित्यं सस्वरमासीत्।

---

[४] तदेव, १४.६ : मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः।
नाना योनिसहस्राणि मयोषितानि यानि वै॥
आहारा विविधा भुक्ताः पीता नानाविधा स्तनाः।
मातरो विविधा दृष्टाः पितरः सुहृदस्तथा॥
अवाङ्मुखः पीड्यमानो जन्तुश्चैव समन्वितः।
साङ्ख्यं योगं समभ्यसेत पुरुषं वा पञ्चविंशकम् ॥

[५] महाभारतम्, अश्वमेधपर्व, १६.३२

[६] निरु० ३.२१ (आनन्दाश्रम, मुद्रणालयः, पूना, १९२१, पृ० २८०)

[७] प्रदीपः महाभाष्यम् १.१.१ एकश्रुत्या हि सूत्राणां पाठात्सर्वेषामुदात्तादीनामुपदेशः कर्तव्य इत्याह......।

[८] महाभाष्यम्, ६.४.१७२: एकश्रुतिनिर्देशात् सिद्धम्।

[९] तदेव, १.१.१ पर प्रदीपोद्योत- अन्ये त्वाहुः एकश्रुत्या सूत्राणि पठन्त, इति।

[१०] कात्या० श्रौत०, १.८.१८ ; तानो वा नित्यत्वात् (कर्कभाष्यमप्यत्र द्रष्टव्यम)

[११] आश्वला० श्रौत०, १.२ ; ता एकश्रुतिः सन्ततमनुब्रूयात;
उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम् (अत्र नारायणकृता वृत्तिरपि द्रष्टव्या)

**स्वरार्थः तस्य दभेदश्च**

महाभाष्यकारस्य मते ये कस्यापि सहायतां विना स्वयमेव उच्चार्यन्ते, प्रकाश्यन्ते ते स्वराः कथ्यन्ते। एतेषामुच्चारणे कस्याप्यन्यवर्णस्यापेक्षा नानुभूयते, परन्तु स्वरं विना व्यञ्जनवर्णाः नोच्चार्यन्ते।[१२] एते स्वरवर्णाः सन्ति- अ,आ,इ,ई,उ,ऊ,ऋ,ॠ, ए, ऐ, ओ, औ इति। पाणिनिना एते 'अच्' इति प्रत्याहारे परिगणिताः। ऋक्प्रातिशाख्ये एतेषाम् 'अक्षर' इति सञ्ज्ञा कृता विद्यते। एतेषाम् स्वरवर्णा विविधैः प्रकारैः उच्चार्यन्ते। एकस्यैव स्वरवर्णस्योच्चारणं कदाचिद् वर्णानामुच्चारणस्थानस्योच्चभागे, कदाचिन्निम्नभागे, कदाचिच्च मध्यमभागे कर्तुं शक्यते। एते उच्च-नीच-मध्यमस्वरोच्चारणविधय एव स्वरधर्मा निगद्यन्ते। धर्म-धर्मिसम्बन्धात् स्वरधर्मा एते, स्वरा इत्युच्यन्ते, यतो ह्येते स्वरवर्णेषु अर्थादक्षरेषु आश्रिताः भवन्ति;[१३] अतः स्वरधर्माणां स्वरत्वं लाक्षणिकं विद्यते। वैदिकवाङ्मयस्याधिकं भागं गेयात्मकमस्ति। तथा भूते सति तेषु प्रयुक्तस्याच्-धर्मरूपस्वरस्य मुख्यतया त्रयो भेदाः स्वीकृताः। ते सन्ति-उदात्तानुदात्तस्वरिताश्चेति। एते त्रयः स्वराः त्रैस्वर्यरूपेण गृह्यन्ते।[१४] वेदमन्त्राणामुच्चारणे त्रैस्वर्याणामेतेषां विधानमुपलभ्यते। प्रायः सर्वासु शिक्षासु, प्रातिशाख्येषु चोदात्तादयः त्रयः स्वराः स्वीकृता।[१५] केचन आचार्याः उदात्तानुदात्तस्वरितप्रचयभेदेन चत्वारः प्रमुखाः स्वराः स्वीकुर्वान्ति। तैत्तिरीयप्रातिशाख्ये[१६], अपि च पाणिनीयशिक्षायां चत्वारः प्रमुखाः स्वराः स्वीकृताः। पाणिनीयशिक्षायां तु सस्थानं तेषां विवेचनमुपलभ्यते। तदनुसारमनुदात्तः हृदि, उदात्तो मूर्धनि, स्वरितः कर्णमूले, प्रचयश्च मुखे ज्ञेयाः भवन्ति।[१७] नारदीयशिक्षायां निघातस्वरः पञ्चमस्वरूपेण स्वीकृतः।[१८] एवमेव महाभाष्ये वाजसनेयिप्रातिशाख्ये चोदात्त – उदात्ततर - अनुदात्त- अनुदात्तानुदात्ततर – स्वरित –स्वरितस्थोदात्त

---

[१२] महाभाष्यम् , १.२.२९: स्वयं राजन्त इति स्वराः, अन्वग्भवति व्यञ्जनम्।

[१३] ऋक्प्राति०, ३.२ : अक्षराश्रयाः।

[१४] वर्ण०र०प्रदी०शि०, ८६ : स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।
स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥

[१५] पा.शि.,११: उदात्तानुदात्तश्च स्वरितश्च स्वरास्त्रयः।
या.शि., १ : उदात्तानुदात्तश्च स्वरितश्च तथैव तत् ।
ना.शि., ८.१ उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः।
ऋ.प्रा., ३.१ : उदात्तानुदात्तश्च स्वरितश्च त्रयः स्वराः।

[१६] तै.प्रा., २३.२०: तच्चतुर्थमभित्युक्तम्।

[१७] पा.शि. ४८ : अनुदात्तो हृदि ज्ञेयो मूर्धन्युदात्त उदाहृतः।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥

[१८] नार.शि., ७.१९ : उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा।
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चमः॥

-एकश्रुतिरूपेण सप्तस्वराः विवेचिताः।[१९] वाजसनेयिप्रातिशाख्येऽन्यत्र जप-साम-न्यूङ्खव्यतिरिक्तेषु मन्त्रेष्वेकः तानस्वरो विहितः[२०], यतो हि यज्ञकर्मणि एकस्यैव स्वरस्यावश्यकता भवति। इत्थं वैदिकस्वराणां सङ्ख्याविषये विदुषां वैमत्यं दृश्यते, परन्तु उदात्तानुदात्त-स्वरितरूपत्रिषु स्वरेषु एव प्रायः सर्वे वैदिकस्वराः समाविष्टाः भवन्ति। उदात्ततरस्यान्तर्भावः उदात्ते, अनुदात्ततरस्य चानुदात्ते भवति। एवमेव प्रचय एकश्रुतिः वा अनुदात्तस्य प्रतिरूप एव; अतोऽस्यान्तर्भावोऽनुदात्ते भवति, यतो हि स्वरितादनन्तरं विद्यमाओऽनुदात्तः प्रचयो भवति । वस्तुतस्तु स्वरस्य उच्च-निम्न-मध्यमरूपोच्चारणदृशा उदात्तः, अनुदात्तः स्वरितश्चेति त्रय एव स्वरा भवन्ति । अन्ये सर्वे स्वराः उच्चारणलक्षणानुसारमेतेषाभवान्तररूपाणि वर्तन्ते।

**वैदिकस्वराणां लक्षणमुच्चारणविधिश्च**

उदात्तः उच्चस्वरः स्वीक्रियते। उच्चैरादीयते इति उदात्तः[२१], अर्थादुच्चारणस्थास्योर्ध्वभागेषु येषामचर्णानामुच्चारणं भवति, तेषामुदात्तसञ्ज्ञा स्वीकृता।[२२]

तैत्तिरीयप्रातिशाख्ये गात्रस्य आयामः (दीर्घता), स्वरस्य दारुण्यमथ च कण्ठविवरस्य संवृतत्वमुदात्तस्वरस्योच्चारणकारणानि निर्दिष्टानि।[२३] ऋक्प्रातिशाख्येऽपि गात्रस्यायामेनोदात्तस्वर-स्योच्चारणं विहितम्।[२४] अतः निश्चयेन वक्तुं शक्यते यत् ताल्वादिस्थानस्योर्ध्वभागेभ्यः उदात्तस्वरः उच्चार्यते। एषः स्वरो नाम्ना सर्वोच्चस्वरो गण्यते, परन्तु ऋक्प्रातिशाख्ये उदात्तः मध्यमस्वरः स्वीकृतः, यतो हि स्वरितस्य यः पूर्वभागः उदात्तो भवति, सः उच्चारणे उदात्ततरो भवति। वस्तुतः उदात्तस्वरः उपरि गम्यमान इव दृश्यते। प्राचीनकालेऽस्योच्चारणं सर्वोच्चध्वनिरूपेण क्रियते स्म, परन्तु साम्प्रतं मध्यमस्वररूपेणास्योच्चारणं क्रियते। मध्यमस्वरकारणादसौ स्वरः त्रिषु स्वरेषु प्रमुखो वर्तते। पदार्थनिर्धारणेऽसौ स्वरः सहायको भवति।

'नीचैरादीयते इत्यनुदात्तः' अर्थादुच्चारणस्थानस्य निम्नभागे उच्चारितः स्वरः अनुदात्तः कथ्यते। एषः स्वरो नीचस्वरः स्वीक्रियते।[२५] वस्तुतः ताल्वादिषु सभागेषु स्थानेषु निम्नभागे निष्पन्नोऽचर्णः

[१९] महाभाष्यम्, १.२.३३: सप्त स्वरा भवन्ति । उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिः सप्तमः।वाज.प्राति. १.१२७

[२०] तदेव, १.१३१ : सामजपन्यूङ्खवर्जम्।
तदेव, १.१३० : एकम्, (अत्र उव्वटकृता व्याख्या – तानलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि)

[२१] अष्टा., १.२.२९ : उच्चैरुदात्तः।

[२२] तदेव, तत्रैव, भट्टोजिदीक्षितस्य व्याख्या- ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसञ्ज्ञकः स्यात्।

[२३] तैत्ति. प्रा., २२.९: आयामो दारुण्यमणुता खस्येत्युच्चैः कराणि शब्दस्य । तुल., महाभाष्यम् १.२.९; वाज. प्राति. १.१०८ इत्यत्र उव्वटव्याख्याआयामोर्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसञ्ज्ञो भवति।

[२४] ऋक् प्रा., ३.९: आयामविश्रम्भाक्षेपैस्त उच्यन्ते।

[२५] अष्टा., १.२.३० : नीचैरनुदात्तः।

अनुदात्तसञ्ज्ञको भवति।[२६] ऋक्प्रातिशाख्येऽस्योच्चारणं विश्रम्भेणोपदिष्टम्।[२७] वायुनिमित्तं शरीरावयवानामधोगमनमेव विश्रम्भ उच्यते।[२८] अतो गात्राणां मार्दवेनाधोगमनेन यः स्वरो निष्पद्यते सोऽनुदात्तसञ्ज्ञको भवति।[२९] तैत्तिरीयप्रातिशाख्यकारस्य मते गात्रस्य मार्दवं, स्वरस्य मृदुता, कण्ठस्य विकासः एवानुदात्तस्योच्चारणे सहायकानि प्रयत्नानि भवन्ति। आपिशलिशिक्षानुसारमपि यदा प्रयत्नो मन्दो भवति, तदा गात्रस्य शैथिल्येन, कर्णविलस्य विकासेन, वायोर्मन्दगतित्वाच्च स्वरस्य स्निग्धता भवति, प्रयत्नेनानेनानुदात्तमुच्चार्यते। यद्यपि वर्णोच्चारणस्थानस्य निम्नभागे स्वरस्योच्चारणं कठिनं वर्तते, यतो ह्यस्योल्लेखः कुत्राऽपि न प्राप्यते, परन्तु कैय्यटस्य मतेऽत्यधिकाभ्यासेनोच्चारणपार्थक्यमवबोद्धुं शक्यते।

सामान्यतया प्रायः सर्वे वैयाकरणाः प्रातिशाख्यकाराश्चोदात्तादव्यवहितपरोऽथवा व्यञ्जनव्यवहितपरोऽनुदात्तः 'स्वरित' इति स्वीकुर्वन्ति ।[३०] अनेनेत्थं प्रतिभाति यदुदात्तादनन्तरमागतोऽनुदात्तः स्वरितो भवति तथा च द्वयोः (उदात्तानुदात्तयोः) समाहारेण स्वरितो भवति।[३१] प्रकारान्तरेणैवं वक्तुं शक्यते यदुदात्तानुदात्तश्चोभौ मिलित्वा स्वरितरूपे परिवर्तेते। यथा त्रपुताम्रयोः संयोगेनापरस्य धातोः कांस्यस्योत्पत्तिर्यथा च गुडदध्नोरेकीभावेन मार्जिकस्योत्पत्तिः भवति तथैवोदात्तानुदात्तयोः समाहारेण स्वरितस्योत्पत्तिर्भवतीत्याचार्यः उव्वटः स्वीकरोति।[३२] विषयेऽस्मिन् सन्देहो जायते, यदुदात्तानुदात्तयोः द्वयोर्वर्णयोः समाहारः स्वरितो भवति अथवा अत्रोदात्तानुदात्तरूपवर्णधर्मयोः समाहारो भवति ? अत्रावधेयं तथ्यमिदमस्ति यदुदात्तत्वानुदात्तत्ववर्णधर्मयोः समाहरो यस्मिन्नचर्णे भवति, सः स्वरितसञ्ज्ञको भवति, यथा स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवास यज्वा सङ्केतयति।[३३] अतः समाहारेण समावेशेन वा द्वयोः धर्मयोरेकधर्मे विपरिणमनं भवति। परिणामतः उदात्तानुदात्तयोः सम्मिश्रणेन तदभिन्नः स्वरितस्वरः

---

[२६] तदेव तत्रैव, भट्टोजिदीक्षितस्य व्याख्या-ताल्वादिषु सभागेषु स्थानेषु निम्नभागे निष्पन्नोऽजनुदात्तसञ्ज्ञः स्यात्।
[२७] ऋ. प्रा. ३.१ : आयामविश्रम्भाक्षेपैस्त उच्यन्ते ।
[२८] तदेव, तत्रैव उव्वटव्याख्या- विश्रम्भो नामाधोगमनं गात्राणां वायुनिमित्तम् । नः। नौ।
[२९] वाज. प्रा. १.१०९ पर उव्वटव्याख्या ।
[३०] अष्टा. ८.४.६६ : उदान्तादनुदात्तस्य स्वरितः।
ऋक्प्राति. ३.३ : एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः।
तैत्ति. प्रा., १४.२९ : उदात्तात्परोऽनुदात्तः स्वरितम्।
वाज. प्रा. ४.१३७ : उदात्ताच्चानुदात्तं स्वरितम्।
[३१] अष्टा. १.२.३१ : समाहारः स्वरितः; तुल. तैत्ति. प्रा. १.४०.
[३२] वाज. प्रा. १.१२६ उपरि उव्वटव्याख्या – यथा त्रपुताम्रयोः संयोगे धात्वन्तरस्य कांस्यस्योत्पत्तिर्यथा च गुडदध्नोरेकीभावे मार्जिकोत्पत्तिरेवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः। तुल. ऋक् प्रा. ३.३ उपरि उव्वटभाष्यमपि द्रष्टव्यम्।
[३३] स्वरसिद्धा., सञ्ज्ञाप्रकरणम् सूत्रम् ३ : उदात्तत्वानुदात्तत्वलक्षणवर्णधर्मसमाहारवान् स्वरितसञ्ज्ञ इत्यर्थः।
तुल. बालमनोरमा सिद्धा. कौ. १.२.२१ – ततश्च उदात्तः अनुदात्तश्च अच् समाह्रियमाणः स्वरित इत्यर्थः प्रतीयते।

निष्पद्यते। अनेन प्रकारेण स्वरितस्य निष्पत्तिः मूलतः द्विविधा भवति, तद्यथा – (१) उदात्तादनन्तरं यदि अव्यवहितोऽनुदात्तः आयाति, तदा उभयोर्स्थाने स्वरितो भवति। सः स्वरितः क्षैप्र-अभिनिहित-प्रश्लिष्टसन्धिभेदेन त्रिविधः उच्यते, यथा –

हि + अ॒ग्ने > ह्य॑ग्ने, नु + इ॒न्द्रः > न्वि॑न्द्रः। (क्षैप्रस्वरितः)।

ते + अ॒व॒र्ध॒न्त > तेऽवर्धन्त। (अभिनिहितस्वरितः)।

स्रु॒चि + इ॒व > स्रु॒चीव (प्रश्लिष्टस्वरितः)।

(२) उदात्तादनन्तरं यदि व्यवहितोऽनुदात्तः आयाति, तदा सोऽनुदात्तः उदात्तप्रभावेण स्वरितो भवति। सः स्वरितः तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तः, वैवृत्तो वा, प्रातिहतः इत्येतैरभिधानैरभिधीयते।

उदात्तानुदात्तयोः ध्वनिसम्मिश्रणेन यः ध्वनिरुत्पद्यते स स्वरितोच्चारणस्य ध्वनिर्भवति। अस्योच्चारणमाक्षेपैः क्रियते।[३४] उव्वटमतानुसारं वायुनिःसारणार्थं गात्राणां तिर्यग्गमनमाक्षेप उच्यते।[३५] अतः यदा वर्णोच्चारणार्थमूर्ध्वप्रयत्नः न क्रियते, न च निम्नप्रयत्नः क्रियते प्रत्युत उभयोः समाहारेण तिर्यग्-रूपेण मिश्रितप्रयत्नः क्रियते, तदा स्वरितस्योच्चारणं भवति।

**स्वरितस्वरे उदात्तानुदात्तयोरंशः**

उदात्तानुदात्तयोः समाहारेण निष्पन्ने स्वरितस्वरे कियानंशः उदात्तः कियान्नंशश्चानुदात्तो भवति, इत्यस्मिन्विषये प्रातिशाख्य-शिक्षा-व्याकरणादिषु ग्रन्थेषु विशदेन विवेचितम्। तदनुसारं स्वरितस्वरे प्रारम्भिकी अर्धमात्रा उदात्तधर्मा भवति शेषश्चांशोऽनुदात्तधर्मा। तद्वत् ह्रस्वस्वरितस्य पूर्वार्धः उदात्तः, उत्तरार्धश्चानुदात्तो भवति।[३६] एवमेव दीर्घस्वरितस्य पूर्वार्धमात्रा उदात्तधर्मा शेषश्चांशः सार्धैका मात्रानुदात्तधर्मा भवति (१.१/२)। तथैव च प्लुतस्वरितस्य पूर्वार्धमात्रा उदात्तधर्मा शेषश्च सार्धमात्राद्वयमनुदात्तयुक्तं भवति (२.१/२)।

वस्तुतस्तु तथ्यमिदमत्रावधेयं वर्तते यत्, स्वरितस्य वर्गद्वयं विद्यते – (१) स्वतन्त्रस्वरितः (२) सामान्यस्वरितश्च। उभौ पृथक्-पृथक् स्वरौ विद्येते, यतो हि **'समाहारः स्वरितः'** इत्येतत् लक्षणं स्वतन्त्रस्वरितस्य वर्तते न तु सामान्यस्वरितस्याश्रितस्वरितस्य वा। वस्तुतः सामान्यस्वरितः जात्या

---

[३४] ऋक् प्रा., ३.१ उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः। आयामविश्रम्भाक्षेपैस्त उच्यन्ते॥

[३५] तत्रैव, उव्वटभाष्यम् – आक्षेपो नाम तिर्यग्गमनं गात्राणां वायुनिमित्तम्;
तुल., चतुरध्यायिका, १.११६ : आक्षिप्तं स्वरितम्।

[३६] अष्टा., १.२.३२ : तस्यादित उदात्तमर्धह्रस्वम्;
ऋक्. प्रा. ३.४ : तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा।
चतुरध्यायिका, १.१७ : स्वरितस्यादितो मात्रार्धमुदात्तम्।
नार. शि., २.२६ : मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्।
तस्यादितोऽर्द्धमात्रा वै शेषं तु परतो भवेत्॥

अनुदात्तो भवति। अत्रोदात्तानुदात्तयोः समाहारो न भवति। यथाचार्यशौनकेन सङ्केतितं यदुदात्तपूर्वस्वरितः पदेऽनुदात्तोऽवगच्छेदिति।[३७] उभयोर्मध्ये (स्वतन्त्र-आश्रितस्वरितयोः) एष भेदो विद्यते यदेकः (स्वतन्त्रस्वरितः) उदात्तानुदात्तयोः समाहारेण निष्पद्यतेऽपरश्च (आश्रितस्वरः) उदात्तात्परोऽनुदात्तः स्वरित उच्यते। स्वतन्त्रस्वरितो द्विविधो भवति (१) सन्धिजोऽसन्धिजश्चेति। असन्धिजस्वरितोऽयं जात्यस्वरित उच्यते। असौ स्वरः जात्या स्वरितो भवति, न तु उदात्तात्परस्यानुदात्तस्य उदात्तप्रभावात् परिवर्तितस्वरितरूपोऽस्ति । ऋक्प्रातिशाख्यानुसारमेष स्वरः सर्वदा यकारस्य वकारस्योपरि निष्पद्यमानोऽनुदात्तपूर्वो नानुदात्तपूर्वो वा स्वरितो जात्यस्वरितः कथ्यते।[३८] तैत्तिरीयप्रातिशाख्येऽसौ नित्यस्वरितः उच्यते।[३९] जात्यस्वरितस्य निरूपणाय महर्षिपाणिनिना स्वतन्त्रसूत्रमेकं प्रदत्तं- **'तित्स्वरितमिति'** (अष्टा. ६.१.१८५)। तदनुसारं 'त्' अनुबन्धयुक्तप्रत्ययसंयोगेन निष्पन्नः शब्दः जात्यस्वरितयुक्तो भवति, यथा – क॒न् + यत् = क॒न्या॑ इति।

प्रातिशाख्येषु शिक्षाग्रन्थेषु च स्वरितस्य सप्त अष्टौ वा भेदाः स्वीकृताः। याज्ञवल्क्यशिक्षायामस्य जात्य- अभिनिहित-क्षैप्र – प्रश्लिष्ट – तैरोव्यञ्जन – तैरोविराम – पादवृत्त – ताथाभाव्याश्चेति अष्टभेदा उल्लिखिताः।[४०] परन्तु नारदीयशिक्षायां ताथाभाव्यस्वरितं विहायान्ये सप्तस्वरिताः वर्णिताः।[४१] स्वरित स्वरस्य भेद-प्रभेदाः निम्नलिखिततालिकया सम्यगवगन्तुं शक्यन्ते-[४२]




[३७] ऋक् प्रा. ३.७ : उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम्।

[३८] ऋक् प्रा. ३.८ : अतोऽन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे।

[३९] तैति. प्रा. २०.२ : सयकारवकारं त्वक्षरं यत्र स्वर्यते स्थिते पदेऽनुदात्तपूर्वेऽपूर्वे वा नित्य इत्येव जानीयात्।

[४०] याज्ञ.शि., ७५, ७६ : अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम्। जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः॥
तैरोव्यञ्जनसञ्ज्ञश्च तथा तैरोविरामकः। पादवृत्तो भवेत्तद्वत्ताथाभाव्य इति स्वराः॥

[४१] नार. शि., १.८.१० : जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जन एव च। तैरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः॥
द्रष्टव्यम्, ऋक् प्रा. ३.७, ३.८, ३.१८ ; तैत्ति. प्रा. २०.१-८ ।

[४२] स्वरितस्वरस्य भेद-प्रभेदानां परिचयार्थं प्रातिशाख्यग्रन्थाः शिक्षाग्रन्थाश्च द्रष्टव्याः। कलेवरवृद्धिभयादत्र नोल्लिखितम्।

स्वरितेषु मुख्यस्वरितस्तु जात्यस्वरित एव, यतो हि एषः प्रकृत्या स्वरितो भवति। अन्येषां स्वरितानां पृथङ्नामकरणस्य कारणं विभिन्ना वैदिकसन्धयः सन्ति।

वैदिकस्वराणां विवेचनप्रसङ्गेऽत्र कम्पस्वरस्य, अथ च प्रचयस्य एकश्रुतेर्वा सामान्यपरिचयोऽपेक्ष्यते। कम्पस्वरः प्रचयस्वरो वा स्वतन्त्रस्वरो नास्ति, प्रत्युत विशेषपरिस्थितौ स्वरितस्य विशिष्टमुच्चारणमेव कम्पस्वरितनाम्नाभिधीयते। स्वतन्त्रस्वरितात्परमुदात्ते स्वतन्त्रस्वरिते वा प्राप्ते सति स्वरितस्योत्तरवर्ती अनुदात्तांशः एकश्रुतिर्न भूत्वा अणुमात्राकालाय निहितो भवति। अस्योच्चारणे कम्पनं जायते। जात्य-क्षैप्र-प्रश्लिष्टाभिनिहितस्वराणामुत्तरवर्ति- अनुदात्तांशस्योच्चारणे कम्पनं भवति, यदि तत्पश्चादुदात्तः स्वतन्त्रस्वरितो वा विद्यमानो भवति।[४३] वस्तुतस्तु स्वरोऽयम् अनुदात्तस्यावस्थाविशेष एव, यस्योच्चारणे कम्पनं भवति। असौ नीचस्वरोऽपि कथ्यते । एवमेव प्रचयस्वरोऽपि कोऽपि स्वतन्त्रस्वरो नास्ति, अपितु मूलतः अनुदात्त एव भवति। यदा स्वरितस्वरात्परमेकमनेकं वानुदात्तं भवति, तदा पूर्ववर्त्तिनः स्वरितस्वरस्य प्रभावेनासौ स्वरः अनुदात्तवत् नोच्चार्य उदात्तवदुच्चार्यतेः; अत एष एव प्रचयः, प्रचितः, निचितः, उदात्तमय इति कथ्यते।[४४] अस्योच्चारणे आचार्येषु वैमत्यं विद्यते। तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणमिति भाष्यानुसारं उदात्तानुदात्तयोः करणरहितः प्रचयो भवति तथा चोदात्तानुदात्तयोः समाहारेणोत्पन्नः स्वरः स्वरित उच्यते।[४५] काशिकाकारस्य मते प्रचयः उदात्तादीनां स्वराणामभेदरूपं भवति।[४६] आश्वलायन-श्रौतसूत्रानुसारमुदात्तानुदात्तस्वरितानामतिशयसन्निकर्षे ऐकश्रुत्यमुच्यते।[४७] शौनकोऽस्योच्चारण-मुदात्तवत् स्वीकरोति।[४८] प्रदीपकारेण कैय्यटेनापि क्षीरोदकवदुदात्तानुदात्तयोरभेदोच्चारणमेव एकश्रुतिरित्यङ्गीकृतम्।[४९] वाजसनेयिप्रातिशाख्यकारोऽपि प्रचये उदात्तधर्मस्याधिक्यं मन्यते।[५०] अतोऽस्योदात्तश्रुतिरिति प्रायः सर्वे आचार्याः स्वीकुर्वन्ति।

---

[४३] ऋक्प्रा. ३.३४ : जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च।
एते स्वाराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः॥

[४४] प्रातिशा. प्र. शिक्षा (शिक्षासङ्ग्रहः), पृ. २१६ – स्वरितात्परमनुदात्तमेकमनेकं वाक्षरमुदात्तवत् एकश्रुत्या उच्चारणीयं स्यात्। अयमेव प्रचयः प्रचितः प्रचो निचित उदात्तमय इति वैदिकैर्व्यवह्रियते। तुल. ऋक्.प्रा. ३.१९ : स्वरितादनुदात्तानां परेषां प्रचयः स्वरः।; अष्टा., १.२.३९ : स्वरितात्संहितायामनुदात्तानाम्।

[४५] वैदिकाभरणम्, २३.१९ : उभयकरणरहितः, प्रचयः, उभयकरणसमावेशजन्यः स्वरित इति।

[४६] काशिका, १.२.३३ : स्वराणामुदात्तादीनामविभागो भेदतिरोदानमेकश्रुतिः।

[४७] आश्व. श्रौत., १.२.९ : उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम्

[४८] ऋक्.प्रा., ३.१९ : स्वरितादनुदात्तानां परेषां प्रचयः स्वरः । उदात्तश्रुतितां यान्त्येकं द्वे वा बहूनि वा॥

[४९] कैय्यटः, प्रदीपः, १.२.३३ : क्षीरोदकवदुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिरित्यर्थः । स्वरिते तु विभागेन तयोरुपलब्धिः तुल., याज्ञ. शि. २२८ : उच्चानुदात्तयोर्योगे स्वरितः स्वार उच्यते। ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽद्भुतः॥

[५०] वाज. प्राति. ४.१३९ : स्वरितात्परमनुदात्तमुदात्तमयम् ।

### स्वराणामुपदेयता प्रयोजनानि वा

स्वरा एव वैदिकभाषायाः वैशिष्ट्यं, यतो ह्युदात्तानुदात्तस्वरितरूपेणास्यां भाषायां विशेषाभिप्रायसम्बद्धो ध्वनिः नियन्त्रितोऽस्ति। वैदिकस्वरेष्वेतेषु स्वराघातो बलाघातश्चोभावपि विद्येते। सस्वरं मन्त्रोच्चारणसमये स्वराणामारोहावरोहनियमानां पालनमावश्यकं भवति; अतः संहितापाठे विहिताः स्वरनियमाः स्वराघातस्यैव वैशिष्ट्यमुल्लिखन्ति। संहितायामनुदात्तादनन्तरमुदात्तः, उदात्तादनन्तरं स्वरितः स्वराघातवशादेव भवन्ति। एवमेवोदात्तानुदात्तजात्यस्वरिताः पदार्थस्य नियामकाः सन्ति; अतो बलाघातेन पदस्वरविमर्शः क्रियते। इत्थं स्वराघातः मन्त्रोच्चारणे सहायको भवति, बालाघातश्च पदार्थनिर्णये उपादेयो भवति। एवं वेदपाठपरिरक्षार्थं वेदमन्त्रार्थचिन्तने च स्वराणामुपयोगो विधीयते।

वेदाध्ययने वैदिकस्वराणां महन्महत्त्वं वर्तते, यतो हि मन्त्राणां सस्वरं शुद्धोच्चारणेऽथ च तेषामर्थनिर्णयेऽपि स्वरज्ञानमावश्यकमिति । वेदार्थावबोधनाय शुद्धमन्त्रोच्चारणाय चाचार्यैः शिक्षावेदाङ्गं विरचितम्। प्रातिशाख्यशिक्षादिग्रन्थेषूदात्तादीनां स्वराणां सविस्तरं विवेचनमुपलभ्यते। पाणिनीयशिक्षानुसारं स्वरदृशा वर्णदृशा चाशुद्धमन्त्रोच्चारणान्न केवलं मन्त्रस्याभिप्रेतोऽर्थो न प्रतीयते, प्रत्युत तेनानर्थोऽप्युपजायते। विशेषेण तत्र प्रतिपादिता इन्द्रवृत्रकथाऽत्रानुसन्धेया। श्रूयते यत्पुरा स्वकीयपुत्रस्य वृत्रस्य शक्तिसम्वर्द्धनाय त्वष्टासुरेण स्म्पादिते यज्ञे ऋत्विग्भिः **’इन्द्रशत्रुः वर्धस्व”** इत्यस्मिन् मन्त्रे **’इन्द्रशत्रु’** पदस्याशुद्धोच्चारणं कृतं, येन यजमानं वृत्रं प्रति तदनिष्टकारकमभवत्।[५१] अत्र इन्द्रशत्रुपदम् **’इन्द्रस्य शत्रुः घातक’** इति विवक्षितेऽर्थे तत्पुरुषसमासे **’समासस्य’** (६.१.२२३) इति सूत्रेण तत्पुरुषत्वादन्तोदात्तमुच्चारणीयमासीत् परं तत्स्थाने यज्ञकर्मणि बहुब्रीहिसमासे आद्युदात्तमुच्चारितं, तथा सति **’बहुब्रीहौ प्रकृत्या पूर्वपदम्’** (अ.६.२.१) इति सूत्रेण **’इन्द्रशत्रुः शातयिता विनाशयिता यस्य स’** इत्यर्थो जातः। स्वरदोषाच्चानिष्टं जातम्। एवमेव सर्वत्र भाषासु नानार्थकाः शब्दाः बहुलमुपलभ्यन्ते । ते च विना तात्पर्यनिर्णयमर्थविशेषं निश्चेतुमसमर्थाः। प्रकरणादिभिरुपायैः तात्पर्यावधारणं सम्पाद्यम्, परन्तु ते कदाचिन्न निर्णायका भवेयुः। स्वरस्तु शब्दगतोऽन्तरङ्गः तन्निर्णायको भवति। अतो वेदार्थनिर्धारणाय स्वरज्ञानमुपादेयमिति बहुभिः आचार्यैः स्वीकृतम्। ऋग्वेदभाष्यकारस्य वेङ्कटमाधवस्य मते स्वरज्ञानेन मन्त्रार्थाः तथैव स्फुटाः सन्देहरहिताश्च भवन्ति, यथान्धकारे दीपिकाभिः सह गच्छन् पुरुषः स्फुटप्रकाशात् क्वचिन्न स्खलति।[५२] मीमांसासूत्रभाष्ये शबरस्वामिनाऽपि स्वीकृतमेतद् यन्मन्त्रेषूदात्तादीनां त्रैस्वर्याणामुच्चारणव्यवस्था मन्त्राणामर्थबोधनाय एव कृता विद्यते।[५३] यदि

---

[५१] पा.शि.,५२ : मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

[५२] स्वरानुक्र. १.८ : अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्। एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥

[५३] शबरः, जै.मी.सू.भा. ९.२.३१ : अथ त्रैस्वर्यादीनां कथं समाम्नातमिति ? उच्यते, अर्थावबोधनार्थं भविष्यति।

सामान्यतया शब्दार्थनिर्धारणं न भवितुमर्हति, तदा उदात्तादयः स्वरा अर्थज्ञापकाः भवन्तीति भर्तृहरिरपि अङ्गीकरोति।[५४] स्वामिदयानन्दोऽपि वेदार्थावबोधे स्वराणामुपादेयत्वं स्वीकृत्य स्वकीये **'सौवरः'** इत्यस्मिन् ग्रन्थे स्वरसूत्राणां व्याख्या कृतवान्।[५५] महाभाष्यकारपतञ्जलेः समयेऽपि मन्त्रोच्चारणाय स्वरस्य तादृशं प्राधान्यमासीद् यल्लोकेऽपि स्वरोल्लङ्घनं क्षमायोग्यं नासीत्।[५६] अतो वेदाध्ययने स्वरस्य महत्त्वं प्रायः सर्वैः स्वीकृतम्।

श्रुत्यर्थनिर्णयस्तु स्वरायत्तो वर्तते, परन्तु स्वरस्यान्यदपि प्रयोजनं सम्भाव्यते। पारलौकिकदृशाऽपि वैदिकस्वराः फलप्रदा भवन्ति। स्वरविशिष्टस्य शब्दस्योच्चारणे मीमांसकाः अदृष्टविशेषमपि फलमभिलषन्ति।[५७] लोकव्यवहारेऽपि स्वराः सहायकाः। पुराकाले लिपिमुद्राणालया-दिसाधनदौर्लभ्यात् वेदानां संरक्षणमध्ययनेनैव कार्यमासीत्। स्वररहितशब्दसङ्घातेभ्यः सस्वराणां धारणं गीतीनामिव सुलभम्। अतो धारणसौलभ्यमपि स्वराणामानुषङ्गिकं फलमिति केचन विद्वांसो मन्यन्ते।[५८] अतः स्वरज्ञानं सर्वथा लाभप्रदमिति।

वेदार्थावबोधनाय स्वरा एते पदार्थनिर्णये त्रिधा सहायका भवन्ति- (१) पदस्वरूपज्ञाने (२) पदार्थज्ञाने (३) वाक्यार्थप्रकाशने च, तद्यथा- वेदमन्त्रेषु नामाख्यातोपसर्गनिपाताश्चेति चतुर्विधानि पदानि प्रयुक्तानि। यदि कस्यचिद् पदविषये सन्देहोपजायते यत् पदमेतत् नाम वाख्यातं वा निपातो वोपसर्गो वेति, तदा चतुर्विधानां पदानां स्वरूपज्ञानार्थं स्वर एव सहायको भवति। विषयेऽस्मिन् 'कः' इति पदमवधेयम्। पदमेतत् 'किम्' सर्वनामपदस्य पुँल्लिङ्ग- प्रथमा- एकवचनस्य रूपमथ च अडभावे लुङ्लकारे कृ धातोः रूपं भवति। अत्र 'कः' इत्यस्य पदस्य निर्णयः स्वरेणैव सम्भाव्यते यत् पदमेतत् सर्वनामपदमाख्यातपदं वा । यतो हि उदात्तयुक्तं 'कः' पदं सर्वनाम भवति, अनुदात्तयुक्तं चेत् क्रियापदं भवति। एवमेव 'त्व' पदं निपातरूपं सर्वनामरूपं वेत्यत्राचार्ययास्कस्य स्वरानुगामिनं मतमवधार्यमिति।[५९] वेङ्कटमाधवोऽपि नाम-आख्यातयोर्विभागं स्वरादेव स्वीकरोति।[६०] इत्थं पदानां **विभक्तिस्वरूपनिर्णये;** (यथा- आद्युदात्तं 'वाचः॑' इति पदं द्वितीया बहुवचनस्य रूपमथ चान्तोदात्तं 'वा॒चः' इति पदं पञ्चमी-षष्ठ्योः एकवचनस्य रूपम्); **शब्दानां लिङ्गनिर्णये** (यथा- आद्युदात्तं 'रक्षः॑' पदं नपुंसकलिङ्गस्यापि च अन्तोदात्तं 'र॒क्षः॑' पदं पुँल्लिङ्गस्य रूपमिति) तथा च **समस्तपदानां निर्णये** (यथा-

---

[५४] वाक्यप., २.३१८ : सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

[५५] ऋ.भा.भू. तृतीय संस्करण- वेदार्थोपयोगितया सङ्क्षेपतः स्वराणां व्यवस्था लिख्यते।

[५६] महाभाष्यम्,१.१.३: एवं हि दृश्यते लोके य उदात्ते कर्त्तव्येऽनुदात्तं करोति। खण्डिकोपाध्यायस्तस्मै चपेटां ददाति...।

[५७] तन्त्रवा., १.३.९ : तेनादृष्टार्थ एवायं स्वरपाठोऽवगम्यते । सर्वदा ब्रह्मयज्ञाङ्गद्रव्ययज्ञजपेषु च ॥

[५८] द्र. स्वरसिद्धान्तचन्द्रिका, उपोद्घातः, पृ. ९

[५९] नि. १.७.८ : त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम् । तत् कथमनुदात्तप्रकृतिः नाम स्यात्।

[६०] ऋक्सर्वा; परिशिष्ट ४, पङ्क्ति ८ - नामाख्यातविभागश्च स्वरादेवावगम्यते।

अन्तोदात्तम् 'इन्द्रपदं' तत्पुरुषस्यम् रूपमथ च मध्योदात्तं 'इन्द्रपदं' बहुब्रीहिसमासस्य रूपमिति) वैदिकस्वराः सहायकाः भवन्ति।

पदार्थज्ञानेऽपि स्वराणां महती भूमिका, यतो हि स्वरभेदेन शब्दानामर्थभेदो भवति, यथा ऋग्वेदसर्वानुक्रमणीग्रन्थे वेङ्कटमाधवो निर्दिशति यदेकस्य शब्दस्यार्थसाम्ये सति सर्वत्र स्वरसाम्यं भवति, परन्तु तस्यैव शब्दस्य यत्र स्वरभेदोपलक्ष्यते तत्रार्थभेदोऽप्युपजायते।[६१] स्वरभेदेन शब्दार्थभेदस्य कारणं वक्त्रा कृतं शब्दांशोपरि बलाघातमेव। उच्चारणसमये वक्ता कदाचित् शब्दस्य प्रकृत्यंशे बलं ददाति, कदाचित्तु प्रत्ययांशे। शब्दस्य यस्मिन् अंशे वक्तुः बलं भवति स एवांश उदात्तो भवति, यतो हि उदात्तस्वरः शब्दस्य मुख्यार्थं द्योतयति। पुनश्च शब्दस्य यस्मिन् अंशे बलं न दीयते, स अनुदात्तांशो गौणार्थं सङ्केतयति, यथाचार्ययास्केन स्वकीये निरुक्तवेदाङ्गे निर्दिष्टम्।[६२] उदाहरणार्थमत्र स्वरभेदेन भिन्नार्थवाचको 'वेद' शब्दो द्रष्टव्यः। विद्(ज्ञाने) इत्येतस्माद् धातोः अच्प्रत्यये कृते निष्पन्नो वेदशब्दः ज्ञानराशेः शब्दराशेर्वा बोधकः। अयं शब्दः 'वृषादीनां च' सूत्रेणाद्युदात्तो भवति (वेदः) । परं √विद् (लाभे) इति धातोः 'वेगवेदवेष्टबन्धाः करणे" इति सूत्रेण घञ्प्रत्ययसंयोगेन निष्पन्नः **'उञ्छादीनां च'** (६.१.१६०) सूत्रेणान्तोदात्तोऽपरो वेदशब्दो दर्भमुष्टिवाचको भवति। एवमेव भ्रातृव्यस्य वधाय (यजु. १.१८) इत्यस्मिन् मन्त्रे 'भ्रातृव्य' शब्दः द्व्यर्थी वर्तते। अतः पदार्थनिर्णये सन्देहो भवति। अत्रापि सन्देहनिवारणं स्वरशास्त्रेणैव भवति। तदनुसारं भ्रातृशब्देन (शत्र्वर्थे) **'व्यन् सपत्ने'** (४.१.१४५) इति सूत्रेण 'व्यन्' प्रत्ययेन निष्पन्नः **'ञ्नित्यादिर्नित्यम्'** (६.१.१९७) सूत्रेणाद्युदात्तो 'भ्रातृव्य' शब्दः शत्रुवाचको भवति, परञ्च भ्रातृशब्देन **'भ्रातुर्व्यच्च'** (४.१.१४४) सूत्रेण 'व्यत्' प्रत्ययसंयोगेन **'तित् स्वरितम्'** (६.१.१८५) सूत्रेणान्तस्वरितो **'भ्रातृव्यः'** अपरः शब्दः भ्रातृपुत्रस्य द्योतको भवति। एवमेवान्ये शब्दा अपि विवेचितव्याः।

वाक्येषु शब्दानां स्वरवैभिन्न्यमेवार्थभेदस्य कारणम्। यतो हि कुत्रचित् शब्दः उदात्तस्वरयुक्तः अन्यत्र स एव शब्दः सर्वानुदात्तयुक्तश्च भवति। परन्तु यदि वाक्यस्यार्थः एक एव तर्हि स्वरः भिन्नो न भवति।वाक्यादौ कानिचित् पदानि उदात्तयुक्तानि भवन्ति परन्तु तान्येवान्यत्र सर्वानुदात्तानि भवन्ति। उदाहरणार्थं सम्बोधनपदानि पादादौ आद्युत्तानि प्रयुज्यन्ते परन्तु पादमध्ये बलाघाताभावात् सर्वानुदात्तानि भवन्ति।[६३] एवमेव क्रियापदानि वाक्यस्यारम्भे उदात्तस्वरयुक्तानि भवन्ति, परन्तु यदा मध्येऽन्ते वा प्रयुज्यन्ते तदा तानि पदानि कदाचिदुदात्तयुक्तानि कदाचिच्च सर्वानुदात्तयुक्तानि भवन्ति। वेङ्कटमाधवस्य मतेऽस्य मुख्यकारणमर्थवैभिन्न्यमेव।[६४] एवमेवाऽन्ये बहवः शब्दाः मन्त्रेषु स्वरदृशा

---

[६१] ऋग्वेदानुः, १.८.१ अर्थाभेदे तु शब्दस्य सर्वत्र सदृशः स्वरः। यदा नतं स्वरं पश्येदन्यथार्थं तदा नयेत्॥

[६२] निरु. ४.२५ : तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्।

[६३] ऋग्वेदः, १.२.२ : आमन्त्रिताद्युदात्तत्त्वमुच्चैरामन्त्रणे भवेत्। नीचैरामन्त्रणे कार्ये पदं सर्वं निहन्यते॥

[६४] तदेव, १.१.७-८ : अथात्र कारणं ब्रूहि वाक्यादौ तिङुदात्तवत्। सर्वानुदात्तमन्यत्र नार्थभेदस्तु कश्चन॥
अर्थभेदादिति ब्रूमः श्रोतारमिह तिङ्वदम्। उदात्तवत् समाहान्ति स यथाभिमुखो भवेत्॥

स्वकीयमर्थवैशिष्ट्यं धारयन्ति, येषां विशदविवेचनं स्वरानुक्रमणीग्रन्थेऽथ च शिक्षाग्रन्थेषूपलभ्यते। तदनुसारमेव मन्त्रार्थव्यवस्था अनुकरणीया; अन्यथा मन्त्रस्य ऋष्यभिप्रेतोऽर्थो न प्रतीयते।

विवेचनेनानेनेत्थं वक्तुं शक्यते यद् मन्त्रेषु प्रयुक्तपदानां वाक्यादीनां चार्थनिर्णये पदानामुदात्तस्वर एव मुख्यो वर्तते। तदनुसारमेव ऋषिदृष्ट्या वैदिकशब्दानामभिप्रेतोऽर्थः ज्ञातुं शक्यत इति निश्चप्रचम्। तथ्यमिदमुररीकृत्यैव बहुभिराचार्यैः, वैयाकरणैः भाष्यकारैश्च स्वरशास्त्रस्योपयोगिता बहुधा विवेचिता। अतो वेदार्थनिर्णय एव स्वरस्य प्रमुखं प्रयोजनमिति ज्ञेयम्। तस्मात्कारणात् अमोघनन्दिनीशिक्षाकारः स्वरविहीनां वाणीं तथैव स्वीकरोति यथा वस्त्रविहीना स्त्री, अथ च दरिद्रस्य रूपवती-पत्नी। तस्य मते स्वरविहीनाः वर्णाः प्राणविहीनशरीरमिव शोभामपि न प्राप्नुवन्ति।[६५]

**प्रो. राजेश्वर मिश्रः**

प्रोफेसर

कुरुक्षेत्र विश्वविद्यालयः, कुरुक्षेत्रम्

[६५] अमोघ शिक्षा : १२६-१२७ : प्रमदा रूपसम्पन्ना दरिद्रस्येव योषित्। स्वरहीना यथा वाणी वस्त्रहीनास्तु योषितः॥
एवं वर्णाः न शोभन्ते प्राणहीनाः शरीरिणः। वेदपाठी सदा सम्यक् विचार्यैवं पुनः पठेत्॥